र्णवस्य गच्छेत् कदाचिदन्यषिमनसापि पारम्। होराशास्त्रेऽपि राशिहोराद्रेक्काणनवांशकद्वादशभागत्रिंशद्भागबलाबलपरिग्रहो ग्रहाणां दिक्स्थानकालचेष्टाभिरनेकप्रकारबलनिर्धारणं प्रकृतिधातुद्रव्यजातिचेष्टादिपरिग्रहो निषेकजन्मकालविस्मापनप्रत्ययादेशसद्योमरणायुर्दायदशान्तर्दशाष्टवर्गराजयोगचन्द्रयोगद्विग्रहादियोगानां नाभसादीनाञ्च योगानां फलान्याश्रयभावावलोकननिर्याणगत्यनूकानि तात्कालिकप्रश्नशुभाशुभनिमित्तानि विवाहादीनाञ्च कर्मणां करणम्। यात्रायाञ्च तिथिदिवसकरणनक्षत्रमुहूर्त्तविलग्नयोगदेहस्पन्दनस्वप्नविजयस्नानग्रहयज्ञगणयागाग्निलिङ्गहस्त्यश्वेङ्गितसेनाप्रवादचेष्टादिग्रहषाड्गुण्योपायमङ्गलामङ्गलशकुनसैन्यनिवेशभूमयोऽग्निवर्णा मन्त्रिचरदूताटविकानां यथाकालं प्रयोगाः परदुर्गलम्भोपायाश्चेत्युक्तं चाचार्यैः। जगति प्रसारितमिवालिखितमिव मतौ निषिक्तमिव हृदये। शास्त्रं यस्य सभगणं नादेशा निष्फलास्तस्य। संहितापारगश्च दैवचिन्तको भवति। यत्रैते संहितापदार्थाः। दिनकरादीनां ग्रहाणां चारास्तेषु च तेषां प्रकृतिविकृतिप्रमाणवर्णकिरणद्युतिसंस्थानास्तमनोदयमार्गमार्गान्तरवक्रानुवक्रर्क्षग्रहसमागमचारादिभिः फलानि नक्षत्रकूर्मविभागेन देशेष्वगस्तिचारः सप्तर्षिचारो ग्रहभक्तयो नक्षत्रव्यूहग्रहशृङ्गाटकग्रहयुद्धग्रहसमागमग्रहवर्षफलगर्भलक्षणरोहिणीस्वात्याषाढीयोगाः सद्योवर्षकुसुमलतापरिधिपरिवेषपरिघपवनोल्कादिग्दाहक्षितिचलनसन्ध्यारागगन्धर्वनगररजोनिर्घातार्घकाण्डसस्यजन्मेन्द्रध्वजेन्द्रचापवास्तुविद्याङ्गविद्यावायसविद्यान्तरचक्रमृगचक्राश्वचक्रवातचक्रप्रासादलक्षणप्रतिमालक्षणप्रतिष्ठापनवृक्षायुर्वेददगार्गलनीराजनखञ्जनोत्पातशान्तिमयूरचित्रकघृतकम्बलखड्गपट्टकृकवाकुकूर्मगोऽजाश्वेभपुरुषस्त्रीलक्षणान्यन्तःपुरचिन्तापिटकलक्षणोपानच्छेदवस्त्रच्छेदचामरदण्डशय्यासनलक्षणरत्नपरीक्षादीपलक्षणदन्तकाष्ठाद्याश्रितानि शुभाशुभानि निमित्तानि सामान्यानि च जगतः प्रतिपुरुषं पार्थिवे च प्रतिक्षणमनन्यकर्माभियुक्तेन दैवज्ञेन चिन्तयितव्यानि। न चैकाकिना शक्यन्तेऽहर्निशमवधारयितुं निमित्तानि। तस्मात् सुभृतेनैव दैवज्ञेनान्ये तद्विदश्चत्वारो भर्त्तव्याः। तत्रैकेनैन्द्री चाग्नेयी च दिगवलोकयितव्या। याम्या नैरृती चान्येनैवं वारुणी वायव्या, चोत्तरा चैशानी चेति। यस्मादुल्कापातादीनि निमित्तानि शीघ्रमुपगच्छन्तीति। तेषां चाकारवर्णस्नेहप्रमाणादिग्रहर्क्षाभिघातादिभिः फलानि भवन्ति। उक्तञ्च गर्गेण महर्षिणा "कृत्स्नाङ्गोपाङ्गकुशलं होरागणितनैष्ठिकम्। यो न पूजयते राजा स नाशमुपगच्छति। वनं समाश्रिता येऽपि निर्ममा निःपरिग्रहाः। अपि ते परिपृच्छन्ति ज्योतिषां गतिकोविदम्। अप्रदीपा यथा रात्रिरनादित्यं यथा नभः। तथाऽसांवत्सरो राजा भ्रमत्यन्ध इवाध्वनि। मुहूर्त्तं तिथिनक्षत्रमृतवश्चायने तथा। सर्वाण्येवाकुलानि स्युर्न स्यात् सांवत्सरो यदि। तस्माद्राज्ञाभिगन्तव्यो विद्वान् सांवत्सरोऽग्रणीः। जयं यशः श्रियं भोगान् श्रेयश्च समभीप्सता। नासांवत्सरिके देशे वस्तव्यं भूतिमिच्छता। चक्षुर्भूतो हि यत्रैष पापं तत्र न विद्यते। न सांवत्सरपाठी च नरकेषूपपद्यते। ब्रह्मलोकप्रतिष्ठाञ्च लभते दैवचिन्तकः। ग्रन्थतश्चार्थतश्चैतत्कृत्स्नं जानाति यो द्विजः! अग्रभुक् स भवेच्छ्राद्धे पूजितः पङ्क्तिपावनः। म्लेच्छा हि यवनास्तेषु सम्यक् शास्त्रमिदं स्थितम्। ऋषिवत्तेऽपि पूज्यन्ते किं पुनर्दैवविद्द्विजः! कुहकावेशपिहितैः कर्णोपश्रुतिहेतुभिः। कृतादेशो न सर्वत्र प्रष्टव्यो न स दैववित्। अविदित्वैव यः शास्त्रं दैवज्ञत्वं प्रपद्यते। स पङ्क्तिदूषकः पापो ज्ञेयो नक्षत्रसूचकः। नक्षत्रसूचकोद्दिष्टमुपवासं करोति यः। स व्रजत्यन्धतामिस्रं सार्द्धमृक्षविडम्बिना। नगरद्वारलोष्टस्य यद्वत् स्यादुपयाचितम्। आदेशस्तद्वदज्ञानां यः सत्यः स विभाव्यते। सम्पत्त्या योजितादेशस्तद्विच्छिन्नकथाप्रियः! । मत्तः शास्त्रैकदेशेन त्याज्यस्तादृग्महीक्षिता। यस्तु सम्यग्विजानाति होरागणितसंहिताः। अभ्यर्च्यः स नरेन्द्रेण स्वीकर्त्तव्यो जयैषिणा। न तत्सहस्रं करिणां वाजिनां वा चतुर्गुणम्। करोति देशकालज्ञो यदेको दैवचिन्तकः। दुःस्वप्नदुर्विचिन्तितदुःप्रेक्षितदुःकृतानि कर्माणि। क्षिप्रं प्रयान्ति नाशं शशिनः श्रुत्वा भसंवादम्। न तथेच्छति भूपतेः पिता जननी वा स्वजनोऽथवा सुहृत्। स्वयशोऽभिविवृद्धये यथा हितमाप्तः सबलस्य दैववित्"।

सि॰शि॰ ज्योतिःशास्त्रस्य वेदनेत्ररूपाङ्गत्वप्रतिपादनेन तदध्ययने द्विजातिमात्रस्यैवाधिकारं प्रतिपाद्य तद्वेत्तुर्गणकस्य प्रशंसा दर्शिता यथा

"त्रुट्यादिप्रलयान्तकालकलना मानप्रभेदः क्रमाच्चारश्च